

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता — क्रम पाठः

## द्वितीयकाण्डे चतुर्थः प्रश्नः

### इष्टिविधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

देवा मनुष्याः। मनुष्याः पितरः। पितरस्ते। ते ऽन्यतः। अन्यत आसन्न्। आसन्नसुराः। असुरा रक्षांसि। रक्षांसि पिशाचाः। पिशाचास्ते। ते ऽन्यतः। अन्यत स्तेषाम्। तेषाम् देवानाम्। देवानामुत। उत यत्। यदल्पम्। अल्पँल्लोहितम्। लोहितमकुर्वन्न्। अकुर्वन् तत्। तद् रक्षांसि। रक्षांसि रात्रीभिः। रात्रीभिरसुभ्नन्न्। रात्रीभिरिति रात्रि—भिः। असुभ्नन् तान्। तान्थ् सुब्धान्। सुब्धान् मृतान्। मृतानभि। अभि वि। व्यौच्छत्। औच्छत् ते। ते देवाः। देवा अविदुः। अविदुर् यः। यो वै। वै नः। नो ऽयम्। अयम् म्रियते। म्रियते रक्षांसि। रक्षांसि वै। वा इमम्। इमम्(२) घ्नन्ति। घ्नन्तीति। इति ते। ते रक्षांसि। रक्षाꣳ-स्युप। उपामन्त्रयन्त। अमन्त्रयन्त तानि। तान्यब्रुवन्न्। अब्रुवन् वरम्। वरँव्वृणामहै। वृणा-महै यत्। यदसुरान्। ॥ [१] ॥ असुरान् जयाम। जयाम तत्। तन्नः। नः सह। सहासत्। असदिति। इति ततः। ततो वै। वै देवाः। देवा असुरान्। असुरानजयन्न्। अजयन् ते। तेऽसुरान्। असुरान् जित्वा। जित्वा रक्षांसि। रक्षाꣳस्यप। अपानुदन्त। अनुदन्त तानि। तानि रक्षांसि। रक्षाꣳस्यनृतम्। अनृतमकर्त। अकर्तेति। इति समन्तम्। समन्तम् देवान्। समन्तमिति सम्—अन्तम्। देवान् परि। पर्यविशन्न्। अविशन् ते। ते देवाः। देवा अग्नौ। अग्नावनाथन्त। अनाथन्त ते। ते ऽग्नये। अग्नये प्रवते। प्रवते पुरोडाशम्। प्रवत इति प्र—वते। पुरोडाशमष्टाकपालम्। अष्टकपालम् निः। अष्टकपालमित्यष्टा—कपालम्। निरवपन्न्।

अवपन्नग्नये। अग्नये विबाधवते। विबाधवते ऽग्नये। विबाधवत इति विबाध—वते। अग्नये प्रती-
कवते। प्रतीकवते यत्। प्रतीकवत इति प्रतीक—वते। यदग्नये। अग्नये प्रवते। प्रवते निरवपन्न्।
प्रवत इति प्र—वते। निरवपन्यानि। निरवपन्निति निः—अवपन्न्। यान्येव। एव पुरस्तात्।
पुरस्ताद् रख्षाꣳसि। रख्षाङ्गुँस्यासन्न्। ॥ [२] ॥ आसन् तानि। तानि तेन। तेन प्र। प्राणु-
दन्त। अनुदन्त यत्। यदग्नये। अग्नये विबाधवते। विबाधवते यानि। विबाधवत इति विबाध—
वते। यान्येव। एवाभितः। अभितो रख्षाꣳसि। रख्षाङ्गुँस्यासन्न्। आसन् तानि। तानि तेन।
तेन वि। व्यबाधन्त। अबाधन्त यत्। यदग्नये। अग्नये प्रतीकवते। प्रतीकवते यानि। प्रतीकवत
इति प्रतीक—वते। यान्येव। एव पश्चात्। पश्चाद् रख्षाꣳसि। रख्षाङ्गुँस्यासन्न्। आसन् तानि।
तानि तेन। तेनाप। अपानुदन्त। अनुदन्त ततः। ततो देवाः। देवा अभवन्न्। अभवन् परा।
परा ऽसुराः। असुरा यः। यो भ्रातृव्यवान्। भ्रातृव्यवान्थ् स्यात्। भ्रातृव्यवानिति भ्रातृव्य—
वान्। स्याथ् सः। स स्पर्द्धमानः। स्पर्द्धमान एतया। एतयेष्ट्या। इष्ट्या यजेत। यजेताग्नये।
अग्नये प्रवते। प्रवते पुरोडाशम्। प्रवत इति प्र—वते। पुरोडाशमष्टाकपालम्। अष्टाकपालम्
निः। अष्टाकपालमित्यष्टा—कपालम्। निर् वपेत्। वपेदग्नये। अग्नये विबाधवते। विबाधवते
ऽग्नये। विबाधवत इति विबाध—वते। ॥ [३] ॥ अग्नये प्रतीकवते। प्रतीकवते यत्। प्रतीक-
वत इति प्रतीक—वते। यदग्नये। अग्नये प्रवते। प्रवते निर्वपति। प्रवत इति प्र—वते। निर्वपति
यः। निर्वपतीति निः—वपति। य एव। एवास्मात्। अस्माच्छ्रेयान्। श्रेयान् भ्रातृव्यः। भ्रातृ-
व्यस्तम्। तम् तेन। तेन प्र। प्र णुदते। नुदते यत्। यदग्नये। अग्नये विबाधवते। विबाधवते
यः। विबाधवत इति विबाध—वते। य एव। एवैनेन। एनेन सदृङ्ङ्। सदृङ् तम्। सदृङ्ङिति
स—दृङ्ङ्। तम् तेन। तेन वि। वि बाधते। बाधते यत्। यदग्नये। अग्नये प्रतीकवते। प्रतीकवते
यः। प्रतीकवत इति प्रतीक—वते। य एव। एवास्मात्। अस्मात् पापीयान्। पापीयान् तम्।
तम् तेन। तेनाप। अप नुदते। नुदते प्र। प्र श्रेयाꣳसम्। श्रेयाꣳसम् भ्रातृव्यम्। भ्रातृव्यम्
नुदते। नुदते ऽति। अति सदृशम्। सदृशम् क्रामति। क्रामति न। नैनम्। एनम् पापीयान्।
पापीयानाप्नोति। आप्नोति यः। य एवम्। एवँविद्वान्। विद्वानेतया। एतयेष्ट्या। इष्ट्या यजते।
यजत इति यजते॥ ॥ [४] ॥

(वृणामहे यत् पुरस्ताद् रख्षांꣳसि वपेदग्नये विबाधवन्त एवं चत्वारि च) ॥ १ ॥

देवासुराः सय्ँय्ँत्ताः। देवासुरा इति देव—असुराः। सय्ँय्ँत्ता आसन्न्। सय्ँय्ँत्ता इति सं—
यत्ताः। आसन् ते। ते देवाः। देवा अब्रुवन्न्। अब्रुवन्यः। यो नः। नो वीर्यावत्तमः। वीर्याव-
त्तमस्तम्। वीर्यावत्तम इति वीर्यावत्—तमः। तमनु। अनु समारभामहै। समारभामहा इति।
समारभामहा इति सम्—आरभामहै। इति ते। त इन्द्रम्। इन्द्रमब्रुवन्न्। अब्रुवन् त्वम्। त्वव्ँवै।
वै नः। नो वीर्यावत्तमः। वीर्यावत्तमोऽसि। वीर्यावत्तम इति वीर्यावत्—तमः। असि त्वाम्।
त्वामनु। अनु समारभामहै। समारभामहा इति। समारभामहा इति सम्—आरभामहै। इति
सः। सो ऽब्रवीत्। अब्रवीत् तिस्रः। तिस्रो मे। म इमाः। इमा स्तनुवः। तनुवो वीर्यावतीः।
वीर्यावतीस्ताः। वीर्यावतीरिति वीर्य—वतीः। ताः प्रीणीत। प्रीणीताथ। अथासुरान्। असु-
रानभि। अभि भविष्यथ। भविष्यथेति। इति ताः। ता वै। वै ब्रूहि। ब्रूहीति। इत्यब्रुवन्न्।
अब्रुवन्नियम्। इयमꣳहोमुक्। अꣳहोमुगियम्। अꣳहोमुगित्यꣳहः—मुक्। इयव्ँविमृधा। विमृ-
धेयम्। विमृधेति वि—मृधा। इयमिन्द्रियावती। इन्द्रियावतीति। इन्द्रियावतीतीन्द्रिय—वती।
॥ [५] ॥ इत्यब्रवीत्। अब्रवीत् ते। त इन्द्राय। इन्द्रायाꣳहोमुचे। अꣳहोमुचे पुरोडाशम्।
अꣳहोमुच इत्यꣳहः—मुचे। पुरोडाशमेकादशकपालम्। एकादशकपालम् निः। एकादशक-
पालमित्येकादश—कपालम्। निरवपन्न्। अवपन्निन्द्राय। इन्द्राय वैमृधाय। वैमृधायेन्द्राय।
इन्द्रायेन्द्रियावते। इन्द्रियावते यत्। इन्द्रियावत इतीन्द्रिय—वते। यदिन्द्राय। इन्द्रायाꣳहो-
मुचे। अꣳहोमुचे निरवपन्न्। अꣳहोमुच इत्यꣳहः—मुचे। निरवपन्नꣳहसः। निरवपन्निति
निः—अवपन्न्। अꣳहस एव। एव तेन। तेनामुच्यन्त। अमुच्यन्त यत्। यदिन्द्राय। इन्द्राय
वैमृधाय। वैमृधाय मृधः। मृध एव। एव तेन। तेनाप। अपाघ्नत। अघ्नत यत्। यदिन्द्राय।
इन्द्रायेन्द्रियावते। इन्द्रियावत इन्द्रियम्। इन्द्रियावत इतीन्द्रिय—वते। इन्द्रियमेव। एव तेन।
तेनात्मन्न्। आत्मन्नदधत। अदधत त्रयस्त्रिꣳशत्कपालम्। त्रयस्त्रिꣳशत्कपालम् पुरोडाशम्।
त्रयस्त्रिꣳशत्कपालमिति त्रयस्त्रिꣳशत्—कपालम्। पुरोडाशम् निः। निरवपन्न्। अवपन् त्रय-
स्त्रिꣳशत्। त्रयस्त्रिꣳशद् वै। त्रयस्त्रिꣳशदिति त्रयः—त्रिꣳशत्। वै देवताः। देवतास्ताः। ता

इन्द्रः। इन्द्र आत्मन्न्। आत्मन्ननु। अनु समारम्भयत। समारम्भयत भूत्यै। समारम्भयतेति सं—आरम्भयत। भूत्यै ताम्। ॥ [६] ॥ ताँव्वाव। वाव देवाः। देवा विजितिम्। विजिति-मुत्तमाम्। विजितिमिति वि—जितिम्। उत्तमामसुरैः। उत्तमामित्युत्—तमाम्। असुरैर् वि। व्यजयन्त। अजयन्त यः। यो भ्रातृव्यवान्। भ्रातृव्यवान्थ् स्यात्। भ्रातृव्यवानिति भ्रातृव्य—वान्। स्याथ् सः। स स्पर्द्धमानः। स्पर्द्धमान एतया। एतयेष्ट्या। इष्ट्या यजेत। यजेतेन्द्राय। इन्द्रायाꣳहोमुचे। अꣳहोमुचे पुरोडाशम्। अꣳहोमुच इत्यꣳहः—मुचे। पुरोडाशमेकादशक-पालम्। एकादशकपालम् निः। एकादशकपालमित्येकादश—कपालम्। निर् वपेत्। वपेदि-न्द्राय। इन्द्राय वैमृधाय। वैमृधायेन्द्राय। इन्द्रायेन्द्रियावते। इन्द्रियावते ऽꣳहसा। इन्द्रिया-वत इतीन्द्रिय—वते। अꣳहसा वै। वा एषः। एष गृहीतः। गृहीतो यस्मात्। यस्माच्छ्रेयान्। श्रेयान् भ्रातृव्यः। भ्रातृव्यो यत्। यदिन्द्राय। इन्द्रायाꣳहोमुचे। अꣳहोमुचे निर्वपति। अꣳहो-मुच इत्यꣳहः—मुचे। निर्वपत्यꣳहसः। निर्वपतीति निः—वपति। अꣳहस एव। एव तेन। तेन मुच्यते। मुच्यते मृधा। मृधा वै। वा एषः। एषो ऽभिषण्णः। अभिषण्णो यस्मात्। अभि-षण्ण इत्यभि—सन्नः। यस्माथ् समानेषु। समानेष्वन्यः। अन्यः श्रेयान्। श्रेयानुत। उताभ्रा-तृव्यः। ॥ [७] ॥ अभ्रातृव्यो यत्। यदिन्द्राय। इन्द्राय वैमृधाय। वैमृधाय मृधः। मृध एव। एव तेन। तेनाप। अप हते। हते यत्। यदिन्द्राय। इन्द्रायेन्द्रियावते। इन्द्रियावत इन्द्रियम्। इन्द्रियावत इतीन्द्रिय—वते। इन्द्रियमेव। एव तेन। तेनात्मन्न्। आत्मन् धत्ते। धत्ते त्रय-स्त्रिꣳशत्कपालम्। त्रयस्त्रिꣳशत्कपालम् पुरोडाशम्। त्रयस्त्रिꣳशत्कपालमिति त्रयस्त्रिꣳशत्—कपालम्। पुरोडाशम् निः। निर् वपति। वपति त्रयस्त्रिꣳशत्। त्रयस्त्रिꣳशद् वै। त्रयस्त्रिꣳशदिति त्रयः—त्रिꣳशत्। वै देवताः। देवतास्ताः। ता एव। एव यजमानः। यजमान आत्मन्न्। आत्म-न्ननु। अनु समारम्भयते। समारम्भयते भूत्यै। समारम्भयत इति सम्—आरम्भयते। भूत्यै सा। सा वै। वा एषा। एषा विजितिः। विजितिर् नाम। विजितिरिति वि—जितिः। नामेष्टिः। इष्टिर् यः। य एवम्। एवँव्विद्वान्। विद्वानेतया। एतयेष्ट्या। इष्ट्या यजते। यजत उत्तमाम्। उत्तमामेव। उत्तमामित्युत्—तमाम्। एव विजितम्। विजितिम् भ्रातृव्येण। विजितिमिति वि—जितिम्। भ्रातृव्येण वि। वि जयते। जयत इति जयते॥ ॥ [८] ॥

(इन्द्रियावती भूत्वा उतै कान्न पञ्चाशच्च) ॥ २ ॥

देवासुराः सय्ँयत्ताः। देवासुरा इति देव—असुराः। सय्ँयत्ता आसन्न्। सय्ँयत्ता इति सम्—यत्ताः। आसन् तेषाम्। तेषाम् गायत्री। गायत्र्योजः। ओजो बलम्। बलमिन्द्रियम्। इन्द्रियव्ँवीर्यम्। वीर्यम् प्रजाम्। प्रजाम् पशून्। प्रजामिति प्र—जाम्। पशून्थ् सङ्गृह्य। सङ्गृह्यादाय। सङ्गृह्येति सम्—गृह्य। आदायापक्रम्य। आदायेत्या—दाय। अपक्रम्यातिष्ठत्। अपक्रम्येत्यप—क्रम्य। अतिष्ठत् ते। तेऽमन्यन्त। अमन्यन्त यतरान्। यतरान्वै। वा इयम्। इयमुपावथ्स्यति। उपावथ्स्यति ते। उपावथ्स्यतीत्युप—आवथ्स्यति। त इदम्। इदं भविष्यन्ति। भविष्यन्तीति। इति ताम्। ताव्ँवि। व्यह्वयन्त। अह्वयन्त विश्वकर्मन्न्। विश्वकर्मन्निति। विश्वकर्मन्निति विश्व—कर्मन्न्। इति देवाः। देवा दाभि। दाभीति। इत्यसुराः। असुराः सा। सा न। नान्यतरान्। अन्यतराङ्ँश्चन। चनोपावर्तत। उपावर्तत ते। उपावर्ततेत्युप—आवर्तत। ते देवाः। देवा एतत्। एतद् यजुः। यजुरपश्यन्न्। अपश्यन्नोजः। ओजोऽसि। असि सहः। सहोऽसि। असि बलम्। बलमसि। असि भ्राजः। ॥ [९] ॥ भ्राजोऽसि। असि देवानाम्। देवानां धाम। धाम नाम। नामाऽसि। असि विश्वम्। विश्वमसि। असि विश्वायुः। विश्वायुः सर्वम्। विश्वायुरिति विश्व—आयुः। सर्वमसि। असि सर्वायुः। सर्वायुरभिभूः। सर्वायुरिति सर्व—आयुः। अभिभूरिति। अभिभूरित्यभि—भूः। इति वाव। वाव देवाः। देवा असुराणाम्। असुराणामोजः। ओजो बलम्। बलमिन्द्रियम्। इन्द्रियव्ँवीर्यम्। वीर्यम् प्रजाम्। प्रजाम् पशून्। प्रजामिति प्र—जाम्। पशूनवृञ्जत। अवृञ्जत यत्। यद् गायत्री। गायत्र्यपक्रम्य। अपक्रम्यातिष्ठत्। अपक्रम्येत्यप—क्रम्य। अतिष्ठत् तस्मात्। तस्मादेताम्। एताम् गायत्री। गायत्रीति। इतीष्टिम्। इष्टिमाहुः। आहुः सव्ँवथ्सरः। सव्ँवथ्सरो वै। सव्ँवथ्सर इति सं—वथ्सरः। वै गायत्री। गायत्री सव्ँवथ्सरः। सव्ँवथ्सरो वै। सव्ँवथ्सर इति सम्—वथ्सरः। वै तत्। तदपक्रम्य। अपक्रम्यातिष्ठत्। अपक्रम्येत्यप—क्रम्य। अतिष्ठद् यत्। यदेतया। एतया देवाः। देवा असुराणाम्। असुराणामोजः। ओजो बलम्। बलमिन्द्रियम्। इन्द्रियव्ँवीर्यम्। वीर्यम् प्रजाम्। ॥ [१०] ॥ प्रजाम् पशून्। प्रजामिति प्र—जाम्। पशूनवृञ्जत। अवृञ्जत तस्मात्। तस्मादेताम्। एताꣳ सव्ँवर्गः।

सँव्वर्ग इति। सँव्वर्ग इति सम्—वर्गः। इतीष्टिम्। इष्टिमाहुः। आहुर् यः। यो भ्रातृव्यवान्। भ्रातृव्यवान्थ् स्यात्। भ्रातृव्यवानिति भ्रातृव्य—वान्। स्याथ् सः। स स्पर्द्धमानः। स्पर्द्धमान एतया। एतयेष्ट्या। इष्ट्या यजेत। यजेताग्नये। अग्नये सँव्वर्गाय। सँव्वर्गाय पुरोडाशम्। सँव्वर्गायेति सम्—वर्गाय। पुरोडाशमष्टाकपालम्। अष्टाकपालम् निः। अष्टाकपालमित्यष्टा—कपालम्। निर् वपेत्। वपेत् तम्। तꣳ शृतम्। शृतमासन्नम्। आसन्नमेतेन। आसन्नमित्या—सन्नम्। एतेन यजुषा। यजुषाऽभि। अभि मृशेत्। मृशेदोजः। ओज एव। एव बलम्। बलमिन्द्रियम्। इन्द्रियँव्वीर्यम्। वीर्यं प्रजाम्। प्रजाम् पशून्। प्रजामिति प्र—जाम्। पशून् भ्रातृव्यस्य। भ्रातृव्यस्य वृङ्क्ते। वृङ्क्ते भवति। भवत्यात्मना। आत्मना परा। परा ऽस्य। अस्य भ्रातृव्यः। भ्रातृव्यो भवति। भवतीति भवति॥ ॥ [११] ॥

(बलमस्ये तया देवा असुराणामोजो बलमिन्द्रियँव्वीर्यं पञ्चचत्वारिꣳशच्च) ॥ ३ ॥

---

प्रजापतिः प्रजाः। प्रजापतिरिति प्रजा—पतिः। प्रजा असृजत। प्रजा इति प्र—जाः। असृजत ताः। ता अस्मात्। अस्माथ् सृष्टाः। सृष्टाः पराचीः। पराचीरायन्न्। आयन् ताः। ता यत्र। यत्रावसन्न्। अवसन् ततः। ततो गर्मुत्। गर्मुदुत्। उदतिष्ठत्। अतिष्ठत् ताः। ता बृहस्पतिः। बृहस्पतिश्च। चान्ववैताम्। अन्ववैताꣳ सः। अन्ववैतामित्यनु—अवैताम्। सोऽब्रवीत्। अब्रवीद् बृहस्पतिः। बृहस्पतिरनया। अनया त्वा। त्वा प्र। प्र तिष्ठानि। तिष्ठान्यथ। अथ त्वा। त्वा प्रजाः। प्रजा उपावर्थ्स्यन्ति। प्रजा इति प्र—जाः। उपावर्थ्स्यन्तीति। उपावर्थ्स्यन्तीत्युप—आवर्थ्स्यन्ति। इति तम्। तम् प्र। प्रातिष्ठत्। अतिष्ठत् ततः। ततो वै। वै प्रजापतिम्। प्रजापतिम् प्रजाः। प्रजापतिमिति प्रजा—पतिम्। प्रजा उपावर्तन्त। प्रजा इति प्र—जाः। उपावर्तन्त यः। उपावर्तन्तेत्युप—आवर्तन्त। यः प्रजाकामः। प्रजाकामः स्यात्। प्रजाकाम इति प्रजा—कामः। स्यात् तस्मै। तस्मा एतम्। एतम् प्राजापत्यम्। प्राजापत्यम् गार्मुतम्। प्राजापत्यमिति प्राजा—पत्यम्। गार्मुतम् चरुम्। चरुम् निः। निर् वपेत्। वपेत् प्रजापतिम्। प्रजापतिमेव। प्रजापतिमिति प्रजा—पतिम्। ॥ [१२] ॥ एव स्वेन। स्वेन भागधेयेन। भागधेयेनोप। भागधेयेनेति भाग—धेयेन। उप धावति। धावति सः। स एव। एवास्मै।

अस्मै प्रजाम्। प्रजाम् प्र। प्रजामिति प्र—जाम्। प्र जनयति। जनयति प्रजापतिः। प्रजापतिः पशून्। प्रजापतिरिति प्रजा—पतिः। पशूनसृजत। असृजत ते। ते ऽस्मात्। अस्माथ् सृष्टाः। सृष्टाः पराञ्चः। पराञ्च आयन्न्। आयन् ते। ते यत्र। यत्रावसन्न्। अवसन् ततः। ततो गर्मुत्। गर्मुदुत्। उदतिष्ठत्। अतिष्ठत् तान्। तान् पूषा। पूषा च। चान्ववैताम्। अन्ववैताꣳ सः। अन्ववैतामित्यनु—अवैताम्। सो ऽब्रवीत्। अब्रवीत् पूषा। पूषा ऽनया। अनया मा। मा प्र। प्र तिष्ठ। तिष्ठाथ। अथ त्वा। त्वा पशवः। पशव उपावर्थ्स्यन्ति। उपावर्थ्स्यन्तीति। उपावर्थ्स्यन्तीत्युप—आवर्थ्स्यन्ति। इति माम्। माम् प्र। प्र तिष्ठ। तिष्ठेति। इति सोमः। सोमो ऽब्रवीत्। अब्रवीन् मम। मम वै। वा अकृष्टपच्यम्। ॥ [१३] ॥ अकृष्टपच्यमिति। अकृष्टपच्यमित्यकृष्ट—पच्यम्। इत्युभौ। उभौ वाम्। वाम् प्र। प्र तिष्ठानि। तिष्ठानीति। इत्यब्रवीत्। अब्रवीत् तौ। तौ प्र। प्रातिष्ठत्। अतिष्ठत् ततः। ततो वै। वै प्रजापतिम्। प्रजापतिम् पशवः। प्रजापतिमिति प्रजा—पतिम्। पशव उपावर्तन्त। उपावर्तन्त यः। उपावर्तन्तेत्युप—आवर्तन्त। यः पशुकामः। पशुकामः स्यात्। पशुकाम इति पशु—कामः। स्यात् तस्मै। तस्मा एतम्। एतꣳ सोमापौष्णम्। सोमापौष्णम् गार्मुतम्। सोमापौष्णमिति सोमा—पौष्णम्। गार्मुतम् चरुम्। चरुम् निः। निर् वपेत्। वपेथ् सोमापूषणौ। सोमापूषणावेव। सोमापूषणाविति सोमा—पूषणौ। एव स्वेन। स्वेन भागधेयेन। भागधेयेनोप। भागधेयेनेति भाग—धेयेन। उप धावति। धावति तौ। तावेव। एवास्मै। अस्मै पशून्। पशून् प्र। प्र जनयतः। जनयतः सोमः। सोमो वै। वै रेतोधाः। रेतोधाः पूषा। रेतोधा इति रेतः—धाः। पूषा पशूनाम्। पशूनाम् प्रजनयिता। प्रजनयिता सोमः। प्रजनयितेति प्र—जनयिता। सोम एव। एवास्मै। अस्मै रेतः। रेतो दधाति। दधाति पूषा। पूषा पशून्। पशून् प्र। प्र जनयति। जनयतीति जनयति॥ ॥ [१४] ॥

(वपेत् प्रजापतिं वै दधाति पूषा त्रीणि च) ॥ ४ ॥

अग्ने गोभिः। गोभिर् नः। न आ। आ गहि। गहीन्दो। इन्दो पुष्ट्या। इन्दो इतीन्दो। पुष्ट्या जुषस्व। जुषस्व नः। न इति नः॥ इन्द्रो धर्ता। धर्ता गृहेषु। गृहेषु नः। न इति नः॥ सविता यः। यः सहस्रियः। सहस्रियः सः। स नः। नो गृहेषु। गृहेषु रारणत्। रारणदिति रारणत्॥

आ पूषा। पूषा एतु। एत्वा। आ वसु। वस्विति वसु॥ धाता ददातु। ददातु नः। नो रयिम्। रयिमीशानः। ईशानो जगतः। जगतस्पतिः। पतिरिति पतिः॥ स नः। नः पूर्णेन। पूर्णेन वावनत्। वावनदिति वावनत्॥ त्वष्टा यः। यो वृषभः। वृषभो वृषा। वृषा सः। स नः। नो गृहेषु। गृहेषु रारणत्। रारणदिति रारणत्॥ सहस्रेणायुतेन। अयुतेन च। चेति च॥ येन देवाः। देवा अमृतम्। अमृतं दीर्घम्। ॥ [१५] ॥ दीर्घꣳ श्रवः। श्रवो दिवि। दिव्यैरयन्त। ऐरयन्तेत्यैरयन्त॥ रायस्पोष। पोष त्वम्। त्वमस्मभ्यम्। अस्मभ्यम् गवाम्। अस्मभ्यमित्यस्म—भ्यम्। गवाम् कुल्मिम्। कुल्मिम् जीवसे। जीवस आ। आ युवस्व। युवस्वेति युवस्व॥ अग्निर् गृहपतिः। गृहपतिः सोमः। गृहपतिरिति गृह—पतिः। सोमो विश्ववनिः। विश्ववनिः सविता। विश्ववनिरिति विश्व—वनिः। सविता सुमेधाः। सुमेधाः स्वाहा। सुमेधा इति सु—मेधाः। स्वाहेति स्वाहा॥ अग्ने गृहपते। गृहपते यः। गृहपत इति गृह—पते। यस्ते। ते घृत्यः। घृत्यो भागः। भागस्तेन। तेन सहः। सह ओजः। ओज आक्रममाणाय। आक्रममाणाय धेहि। आक्रममाणायेत्या—क्रममाणाय। धेहि श्रैष्ठ्यात्। श्रैष्ठ्यात् पथः। पथो मा। मा योषम्। योषम् मूर्द्धा। मूर्द्धा भूयासम्। भूयासꣳ स्वाहा। स्वाहेति स्वाहा॥ ॥ [१६] ॥

(अमृत मष्टात्रिꣳशच्च) ॥ ५ ॥

चित्रया यजेत। यजेत पशुकामः। पशुकाम इयम्। पशुकाम इति पशु—कामः। इयवैं। वै चित्रा। चित्रा यत्। यद् वै। वा अस्याम्। अस्याँव्विश्वम्। विश्वम् भूतम्। भूतमधि। अधि प्रजायते। प्रजायते तेन। प्रजायत इति प्र—जायते। तेनेयम्। इयम् चित्रा। चित्रा यः। य एवम्। एवँव्विद्वान्। विद्वाꣳश्चित्रया। चित्रया पशुकामः। पशुकामो यजते। पशुकाम इति पशु—कामः। यजते प्र। प्र प्रजया। प्रजया पशुभिः। प्रजयेति प्र—जया। पशुभिर् मिथुनैः। पशुभिरिति पशु—भिः। मिथुनैर् जायते। जायते प्र। प्रैव। एवाग्नेयेन। आग्नेयेन वापयति। वापयति रेतः। रेतः सौम्येन। सौम्येन दधाति। दधाति रेतः। रेत एव। एव हितम्। हितम् त्वष्टा। त्वष्टा रूपाणि। रूपाणि वि। वि करोति। करोति सारस्वतौ। सारस्वतौ भवतः। भवत एतत्। एतद् वै। वै दैव्यम्। दैव्यम् मिथुनम्। मिथुनम् दैव्यम्। दैव्यमेव। एवास्मै। अस्मै मिथुनम्। ॥ [१७] ॥

मिथुनम् मंद्ध्यतः। मद्ध्यतो दंधाति। दधाति पुष्ट्यै। पुष्ट्यै प्रजननाय। प्रजननाय सिनीवाल्यै। प्रजननायेति प्र—जननाय। सिनीवाल्यै चरुः। चरुर् भंवति। भवति वाक्। वाग् वै। वै सिंनी-वाली। सिनीवाली पुष्टिः। पुष्टिः खलु। खलु वै। वै वाक्। वाक् पुष्टिम्। पुष्टिमेव। एव वाचम्। वाचमुप। उपैति। एत्यैन्द्रः। ऐन्द्र उत्तमः। उत्तमो भंवति। उत्तम इत्युत्—तमः। भवति तेन। तेनैव। एव तत्। तन्मिथुनम्। मिथुनꣳ सप्त। सप्तैतानि। एतानि हवीꣳषि। हवीꣳषि भवन्ति। भवन्ति सप्त। सप्त ग्राम्याः। ग्राम्याः पशवः। पशवः सप्त। सप्तारण्याः। आरण्याः सप्त। सप्त छन्दांꣳसि। छन्दाꣳस्युभयस्य। उभयस्यावरुद्ध्यै। अवरुद्ध्या अथ। अवरुद्ध्या इत्यव—रुद्ध्यै। अथैताः। एता आहुतीः। अहुतीर् जुहोति। आहुतीरित्या—हुतीः। जुहोत्येते। एते वै। वै देवाः। देवाः पुष्टिपतयः। पुष्टिपतयस्ते। पुष्टिपतय इति पुष्टि—पतयः। त एव। एवास्मिन्न्। अस्मिन् पुष्टिम्। पुष्टिम् दधति। दधति पुष्यति। पुष्यति प्रजया। प्रजया पशुभिः। प्रजयेति प्र—जया। पशुभिरथो। पशुभिरिति पशु—भिः। अथो यत्। अथो इत्यथो। यदेताः। एता आहुतीः। आहुतीर् जुहोति। आहुतीरित्या—हुतीः। जुहोति प्रतिष्ठित्यै। प्रतिष्ठित्या इति प्रति—स्थित्यै॥ ॥ [१८] ॥

(अस्मै त एव द्वादश च) ॥ ६ ॥

मारुतमसि। असि मरुताम्। मरुतामोजः। ओजो ऽपाम्। अपाम् धाराम्। धाराम् भिन्धि। भिन्धि रमयत। रमयत मरुतः। मरुतः श्येनम्। श्येनमायिनम्। आयिनम् मनोजवसम्। मनोजवसँव्वृषणम्। मनोजवसमिति मनः—जवसम्। वृषणꣳ सुवृक्तिम्। सुवृक्तिमिति सु—वृक्तिम्॥ येन शर्द्धः। शर्द्ध उग्रम्। उग्रमवसृष्टम्। अवसृष्टमेति। अवसृष्टमित्यव—सृष्टम्। एति तत्। तदश्विना। अश्विना परि। परि धत्तम्। धत्तꣳ स्वस्ति। स्वस्तीति स्वस्ति॥ पुरो-वातो वर्षन्न्। पुरोवात इति पुरः—वातः। वर्षन् जिन्वः। जिन्वरावृत्। आवृथ् स्वाहा। आवृदित्या—वृत्। स्वाहा वातावत्। वातावद् वर्षन्न्। वातावदिति वात—वत्। वर्षन्नुग्रः। उग्ररावृत्। आवृथ् स्वाहा। आवृदित्या—वृत्। स्वाहा स्तनयन्न्। स्तनयन् वर्षन्न्। वर्षन् भीमः। भीमरावृत्। आवृथ् स्वाहा। आवृदित्या—वृत्। स्वाहा ऽनशनि। अनशन्यवस्फूर्जन्न्।

अवस्फूर्जन् दिद्युत्। अवस्फूर्जन्नित्यव—स्फूर्जन्न्। दिद्युद् वर्षन्न्। वर्षन् त्वेषः। त्वेषरावृत्। आवृथ् स्वाहा। आवृदित्या—वृत्। स्वाहा ऽतिरात्रम्। अतिरात्रँव्वर्षन्न्। अतिरात्रमित्यति—रात्रम्। वर्षन् पूर्तिः। पूर्तिरावृत्। आवृथ् स्वाहा। आवृदित्या—वृत्। ॥ [१९] ॥ स्वाहा बहु। बहु ह। हायम्। अयमवृषात्। अवृषादिति। इति श्रुतः। श्रुतरावृत्। आवृथ् स्वाहा। आवृदित्या—वृत्। स्वाहा ऽऽतपति। आतपति वर्षन्न्। आतपतीत्या—तपति। वर्षन्विराट्। विराडावृत्। विराडिति वि—राट्। आवृथ् स्वाहा। आवृदित्या—वृत्। स्वाहा ऽवस्फूर्जन्न्। अवस्फूर्जन् दिद्युत्। अवस्फूर्जन्नित्यव—स्फूर्जन्न्। दिद्युद् वर्षन्न्। वर्षन् भूतः। भूतरावृत्। आवृथ् स्वाहा। आवृदित्या—वृत्। स्वाहा मान्दाः। मान्दा वाशाः। वाशाः शुन्ध्यूः। शुन्ध्यूरजिराः। अजिरा इत्यजिराः॥ ज्योतिष्मतीस्तमस्वरीः। तमस्वरीरुन्दतीः। उन्दतीः सुफेनाः। सुफेना इति सु—फेनाः॥ मित्रभृतः ख्षत्रभृतः। मित्रभृत इति मित्र—भृतः। ख्षत्रभृतः सुराष्ट्राः। ख्षत्रभृत इति ख्षत्र—भृतः। सुराष्ट्रा इह। सुराष्ट्रा इति सु—राष्ट्राः। इहमा। माऽवत। अवतेत्यवत॥ वृष्णो अश्वस्य। अश्वस्य सन्दानम्। सन्दानमसि। सन्दानमिति सं—दानम्। असि वृष्ट्यै। वृष्ट्यै त्वा। त्वोप। उप नह्यामि। नह्यामीति नह्यामि॥ ॥ [२०] ॥

(पूर्तिरावृद् द्विचत्वारिꣳशच्च) ॥ ७ ॥

---

देवा वसव्याः। वसव्या अग्ने। अग्ने सोम। सोम सूर्य। सूर्येति सूर्य॥ देवाः शर्मण्याः। शर्मण्या मित्रावरुणा। मित्रावरुणा ऽर्यमन्न्। मित्रावरुणेति मित्रा—वरुणा। अर्यमन्नित्यर्यमन्न्॥ देवाः सपीतयः। सपीतयोऽपाम्। सपीतय इति स—पीतयः। अपाम् नपात्। नपादाशुहेमन्न्। आशुहेमन्नित्याशु—हेमन्न्॥ उद्नो दत्त। दत्तोदधिम्। उदधिम् भिन्त। उदधिमित्युद—धिम्। भिन्त दिवः। दिवः पर्जन्यात्। पर्जन्यादन्तरिख्षात्। अन्तरिख्षात् पृथिव्याः। पृथिव्यास्ततः। ततो नः। नो वृष्ट्या। वृष्ट्या ऽवत। अवतेत्यवत॥ दिवा चित्। चित् तमः। तमः कृण्वन्ति। कृण्वन्ति पर्जन्येन। पर्जन्येनोदवाहेन। उदवाहेनेत्युद—वाहेन॥ पृथिवीय्यँत्। यद् व्युन्दन्ति। व्युन्दन्तीति वि—उन्दन्ति॥ आ यम्। यम् नरः। नरः सुदानवः। सुदानवो ददाशुषे। सुदानव इति सु—दानवः। ददाशुषे दिवः। दिवः कोशम्। कोशमचुच्यवुः।

अचुच्यवु,रित्यचुच्यवुः॥ वि पर्जन्याः। पर्जन्याः सृजन्ति। सृजन्ति रोदसी। रोदसी अनु। रोदसी इति रोदसी। अनु धन्वना। धन्वना यन्ति। यन्ति वृष्टयः। ॥ [२१] ॥ वृष्टय इति वृष्टयः॥ उदीरयथ। ईरयथा मरुतः। मरुतः समुद्रतः। समुद्रतो यूयम्। यूयँव्वृष्टिम्। वृष्टिँव्वर्षयथ। वर्षयथा पुरीषिणः। पुरीषिण इति पुरीषिणः॥ न वः। वो दस्राः। दस्रा उप। उप दस्यन्ति। दस्यन्ति धेनवः। धेनवः शुभम्। शुभँय्यातम्। यातामनु। अनु रथाः। रथा अवृथ्सत। अवृथ्सतेत्यवृथ्सत॥ सृजा वृष्टिम्। वृष्टिम् दिवः। दिव आ। आ ऽद्भिः। अद्भिः समुद्रम्। अद्भिरित्यत्—भिः। समुद्रम् पृण। पृणेतिपृण॥ अब्जा असि। अब्जा इत्यप्—जाः। असि प्रथमजाः। प्रथमजा बलम्। प्रथमजा इति प्रथम—जाः। बलमसि। असि समुद्रियम्। समुद्रियमिति समुद्रियम्॥ उन्नम्भय। नम्भय पृथिवीम्। पृथिवीम् भिन्धि। भिन्धीदम्। इदम् दिव्यम्। दिव्यम् नभः। नभ इति नभः॥ उद्नो दिव्यस्य। दिव्यस्य नः। नो देहि। देहीशानः। ईशानो वि। वि सृज। सृजा दृतिम्। दृतिमिति दृतिम्॥ ये देवाः। देवा दिविभागाः। दिविभागा ये। दिविभागा इति दिवि—भागाः। येऽन्तरिक्षभागाः। अन्तरिक्षभागा ये। अन्तरिक्षभागा इत्यन्तरिक्ष—भागाः। ये पृथिविभागाः। पृथिविभागा इति पृथिवि—भागाः॥ त इमम्। इमँय्यज्ञम्। यज्ञमवन्तु। अवन्तु ते। त इदम्। इदम् क्षेत्रम्। क्षेत्रमा। आ विशन्तु। विशन्तु ते। त इदम्। इदम् क्षेत्रम्। क्षेत्रमनु। अनु वि। वि विशन्तु। विशन्त्विति विशन्तु॥ ॥ [२२] ॥

(यन्ति देवा विंशतिश्च) ॥ ८ ॥

मारुतमसि। असि मरुताम्। मरुतामोजः। ओज इति। इति कृष्णम्। कृष्णँव्वासः। वासः कृष्णतूषम्। कृष्णतूषम् परि। कृष्णतूषमिति कृष्ण—तूषम्। परि धत्ते। धत्त एतत्। एतद् वै। वै वृष्ट्यै। वृष्ट्यै रूपम्। रूपꣳ सरूपः। सरूप एव। सरूप इति स—रूपः। एव भूत्वा। भूत्वा पर्जन्यम्। पर्जन्यँव्वर्षयति। वर्षयति रमयत। रमयत मरुतः। मरुतः श्येनम्। श्येनमायिनम्। आयिनमिति। इति पश्चाद्वातम्। पश्चाद्वातम् प्रति। पश्चाद्वातमिति पश्चात्—वातम्। प्रति मीवति। मीवति पुरोवातम्। पुरोवातमेव। पुरोवातमिति पुरः—वातम्। एव जनयति। जनयति वर्षस्य। वर्षस्यावरुद्ध्यै। अवरुद्ध्यै वातनामानि। अवरुद्ध्या इत्यव—रुद्ध्यै। वात-

नामानि जुहोति। वातनामानीति वात—नामानि। जुहोति वायुः। वायुर् वै। वै वृष्ट्याः। वृष्ट्या ईशे। ईशे वायुम्। वायुमेव। एव स्वेन। स्वेन भागधेयेन। भागधेयेनोप। भागधेयेनेति भाग—धेयेन। उप धावति। धावति सः। स एव। एवास्मै। अस्मै पर्जन्यम्। पर्जन्यँव्वर्षयति। वर्षयत्यष्टौ। अष्टौ जुहोति। ॥ [२३] ॥ जुहोति चतस्रः। चतस्रो वै। वै दिशः। दिशश्चतस्रः। चतस्रो ऽवान्तरदिशाः। अवान्तरदिशा दिग्भ्यः। अवान्तरदिशा इत्यवान्तर—दिशाः। दिग्भ्य एव। दिग्भ्य इति दिक्—भ्यः। एव वृष्टिम्। वृष्टिꣳ सम्। सम् प्र। प्र च्यावयति। च्यावयति कृष्णाजिने। कृष्णाजिने सम्। कृष्णाजिन इति कृष्ण—अजिने। सय्ँयौति। यौति हविः। हविरेव। एवाकः। अकरन्तर्वेदि। अन्तर्वेदि सम्। अन्तर्वेदीत्यन्तः—वेदि। सय्ँयौति। यौत्यवरुद्ध्यै। अवरुद्ध्यै यतीनाम्। अवरुद्ध्या इत्यव—रुद्ध्यै। यतीनामद्यमानानाम्। अद्यमानानाꣳ शीर्षाणि। शीर्षाणि परा। परा ऽपतन्न्। अपतन् ते। ते खर्जूराः। खर्जूरा अभवन्न्। अभवन् तेषाम्। तेषाꣳ रसः। रस ऊर्द्ध्वः। ऊर्द्ध्वो ऽपतत्। अपतत् तानि। तानि करीराणि। करीराण्यभवन्न्। अभवन्थ् सौम्यानि। सौम्यानि वै। वै करीराणि। करीराणि सौम्या। सौम्या खलु। खलु वै। वा आहुतिः। आहुतिर् दिवः। आहुतिरित्या—हुतिः। दिवो वृष्टिम्। वृष्टिम् च्यावयति। च्यावयति यत्। यत् करीराणि। करीराणि भवन्ति। भवन्ति सौम्यया। ॥ [२४] ॥ सौम्ययैव। एवाहुत्या। आहुत्या दिवः। आहुत्येत्या—हुत्या। दिवो वृष्टिम्। वृष्टिमव। अव रुन्धे। रुन्धे मधुषा। मधुषा सम्। सय्ँयौति। यौत्यपाम्। अपाव्ँवै। वा एषः। एष ओषधीनाम्। ओषधीनाꣳ रसः। रसो यत्। यन् मधु। मध्वद्भ्यः। अद्भ्य एव। अद्भ्य इत्यत्—भ्यः। एवौषधीभ्यः। ओषधीभ्यो वर्षति। ओषधीभ्य इत्योषधि—भ्यः। वर्षत्यथो। अथो अद्भ्यः। अथो इत्यथो। अद्भ्य एव। अद्भ्य इत्यत्—भ्यः। एवौषधीभ्यः। ओषधीभ्यो वृष्टिम्। ओषधीभ्य इत्योषधि—भ्यः। वृष्टिम् नि। नि नयति। नयति मान्दाः। मान्दा वाशाः। वाशा इति। इति सम्। सय्ँयौति। यौति नामधेयैः। नामधेयैरेव। नामधेयैरिति नाम—धेयैः। एवैनाः। एना अच्छ। अच्छैति। एत्यथो। अथो यथा। अथो इत्यथो। यथा ब्रूयात्। ब्रूयादसौ। असावा। एहि। इहीति। इत्येवम्। एवमेव। एवैनाः। एना नामधेयैः। नामधेयैरा। नामधेयैरिति नाम—धेयैः। आ च्यावयति। ॥ [२५] ॥ च्यावयति वृष्णः। वृष्णो अश्वस्य। अश्वस्य सन्दानम्। सन्दा-

नमसि। सन्दानमिति सं—दानम्॥ असि वृष्ट्यै। वृष्ट्यै त्वा। त्वोप। उप नह्यामि। नह्यामीति। इत्याह। आह वृषा। वृषा वै। वा अश्वः। अश्वो वृषा। वृषा पर्जन्यः। पर्जन्यः कृष्णः। कृष्ण इव। इव खलु। खलु वै। वै भूत्वा। भूत्वा वर्षति। वर्षति रूपेण। रूपेणैव। एवैनम्। एनꣳ सम्। समर्द्धयति। अर्द्धयति वर्षस्य। वर्षस्यावरुद्ध्यै। अवरुद्ध्या इत्यव—रुद्ध्यै॥ ॥ [२६] ॥

(अष्टौ भवन्ति नामधेयैरे कान्न त्रिꣳशच्च) ॥ ९ ॥

देवा वसव्याः। वसव्या देवाः। देवाः शर्मण्याः। शर्मण्या देवाः। देवाः सपीतयः। सपीतय इति। सपीतय इति स—पीतयः। इत्या। आ बध्नाति। बध्नाति देवताभिः। देवताभिरेव। एवा-न्वहम्। अन्वहँवृँष्टिम्। अन्वहमित्यनु—अहम्। वृष्टिमिच्छति। इच्छति यदि। यदि वर्षेत्। वर्षेत् तावति। तावत्येव। एव होतव्यम्। होतव्यँय्यँदि। यदि न। न वर्षेत्। वर्षेच्छ्वः। श्वो भूते। भूते हविः। हविर् निः। निर् वपेत्। वपेदहोरात्रे। अहोरात्रे वै। अहोरात्रे इत्यहः—रात्रे। वै मित्रावरुणौ। मित्रावरुणावहोरात्राभ्याम्। मित्रावरुणाविति मित्रा—वरुणौ। अहोरा-त्राभ्याम् खलु। अहोरात्राभ्यामित्यहः—रात्राभ्याम्। खलु वै। वै पर्जन्यः। पर्जन्यो वर्षति। वर्षति नक्तम्। नक्तँवा। वा हि। हि दिवा। दिवा वा। वा वर्षति। वर्षति मित्रावरुणौ। मित्रावरुणावेव। मित्रावरुणाविति मित्रा—वरुणौ। एव स्वेन। स्वेन भागधेयेन। भागधेये-नोप। भागधेयेनेति भाग—धेयेन। उप धावति। धावति तौ। तावेव। एवास्मै। अस्मा अहोरा-त्राभ्याम्। ॥ [२७] ॥ अहोरात्राभ्याम् पर्जन्यम्। अहोरात्राभ्यामित्यहः—रात्राभ्याम्। पर्ज-न्यँवर्षयतः। वर्षयतोऽग्नये। अग्नये धामच्छदे। धामच्छदे पुरोडाशम्। धामच्छद इति धाम—छदे। पुरोडाशमष्टाकपालम्। अष्टाकपालम् निः। अष्टाकपालमित्यष्टा—कपालम्। निर् वपेत्। वपेन् मारुतम्। मारुतꣳ सप्तकपालम्। सप्तकपालꣳ सौर्यम्। सप्तकपालमिति सप्त—कपालम्। सौर्यमेककपालम्। एककपालमग्निः। एककपालमित्येक—कपालम्। अग्निर् वै। वा इतः। इतो वृष्टिम्। वृष्टिमुत्। उदीरयति। ईरयति मरुतः। मरुतः सृष्टाम्। सृष्टाम् नयन्ति। नयन्ति यदा। यदा खलु। खलु वै। वा असौ। असावादित्यः। आदित्यो न्यङ्ङ्। न्यङ् रश्मिभिः। रश्मिभिः पर्यावर्तते। रश्मिभिरिति रश्मि—भिः। पर्यावर्तते ऽथ। पर्यावर्तत इति

परि—आवर्तते। अथ वर्षति। वर्षति धामच्छत्। धामच्छदिव। धामच्छदिति धाम—छत्। इव खलु। खलु वै। वै भूत्वा। भूत्वा वर्षति। वर्षत्येताः। एता वै। वै देवताः। देवता वृष्ट्याः। वृष्ट्या ईशते। ईशते ताः। ता एव। एव स्वेन। स्वेन भागधेयेन। भागधेयेनोप। भागधेयेनेति भाग—धेयेन। उप धावति। धावति ताः। ता एव। ॥ [२८] ॥ एवास्मै। अस्मै पर्जन्यम्। पर्जन्यँव्वर्षयन्ति। वर्षयन्त्युत। उतावर्षिष्यन्न्। अवर्षिष्यन् वर्षति। वर्षत्येव। एव सृज। सृजा वृष्टिम्। वृष्टिम् दिवः। दिव आ। आऽद्भिः। अद्भिः समुद्रम्। अद्भिरित्यत्—भिः। समुद्रम् पृण। पृणेति। इत्याह। आहेमाः। इमाश्च। चैव। एवामूः। अमूश्च। चापः। अपः सम्। समर्द्ध-यति। अर्द्धयत्यथो। अथो आभिः। अथो इत्यथो। आभि रेव। एवामूः। अमूरच्छ। अच्छैति। एत्यब्जाः। अब्जा असि। अब्जा इत्यप्—जाः। असि प्रथमजाः। प्रथमजा बलम्। प्रथमजा इति प्रथम—जाः। बलमसि। असि समुद्रियम्। समुद्रियमिति। इत्याह। आह यथायजुः। यथायजुरेव। यथायजुरिति यथा—यजुः। एवैतत्। एतदुत्। उन्नम्भय। नम्भय पृथिवीम्। पृथि-वीमिति। इति वर्षाह्वाम्। वर्षाह्वाम् जुहोति। वर्षाह्वामिति वर्ष—ह्वाम्। जुहोत्येषा। एषा वै। वा ओषधीनाम्। ओषधीनाँव्वृष्टिवनिः। वृष्टिवनिस्तया। वृष्टिवनिरिति वृष्टि—वनिः। तयैव। एव वृष्टिम्। वृष्टिमा। आ च्यावयति। च्यावयति ये। ये देवाः। देवा दिविभागाः। दिविभागा इति। दिविभागा इति दिवि—भागाः। इति कृष्णाजिनम्। कृष्णाजिनमव। कृष्णाजिनमिति कृष्ण—अजिनम्। अव धूनोति। धूनोतीमे। इम एव। एवास्मै। अस्मै लोकाः। लोकाः प्रीताः। प्रीता अभीष्टाः। अभीष्टा भवन्ति। अभीष्टा इत्यभि—इष्टाः। भवन्तीति भवन्ति॥ ॥ [२९] ॥

(अस्मै धावति ता वा एकविꣳशतिश्च) ॥ १० ॥

सर्वाणि छन्दाꣳसि। छन्दाꣳस्येतस्याम्। एतस्यामिष्ट्याम्। इष्ट्यामनूच्यानि। अनूच्या-नीति। अनूच्यानीत्यनु—उच्यानि। इत्याहुः। आहुस्त्रिष्टुभः। त्रिष्टुभो वै। वा एतत्। एतद् वीर्यम्। वीर्यँय्यत्। यत् ककुत्। ककुदुष्णिहा। उष्णिहा जगत्यै। जगत्यै यत्। यदुष्णिह-ककुभौ। उष्णिहककुभावन्वाह। उष्णिहककुभावित्युष्णिह—ककुभौ। अन्वाह तेन। अन्वा-हेत्यनु—आह। तेनैव। एव सर्वाणि। सर्वाणि छन्दाꣳसि। छन्दाꣳस्यव। अव रुन्धे। रुन्धे

गायत्री। गायत्री वै। वा एषा। एषा यत्। यदुष्णिहा। उष्णिहा यानि। यानि चत्वारि। चत्वा-र्यधि। अद्ध्यक्षराणि। अक्षराणि चतुष्पादः। चतुष्पाद एव। चतुष्पाद् इति चतुः—पादः। एव ते। ते पशवः। पशवो यथा। यथा पुरोडाशे। पुरोडाशे पुरोडाशः। पुरोडाशोऽधि। अद्ध्येवम्। एवमेव। एव तत्। तद् यत्। यदृचि। ऋच्यधि। अद्ध्यक्षराणि। अक्षराणि यत्। यज्जगत्या। जगत्या परिदद्ध्यात्। ॥ [३०] ॥ परिदद्ध्यादन्तम्। परिदद्ध्यादिति परि—दद्ध्यात्। अन्त-य्यँज्ञम्। यज्ञम् गमयेत्। गमयेत् त्रिष्टुभा। त्रिष्टुभा परि। परि दधाति। दधातीन्द्रियम्। इन्द्रि-यव्वै। वै वीर्यम्। वीर्यं त्रिष्टुक्। त्रिष्टुगिन्द्रिये। इन्द्रिय एव। एव वीर्ये। वीर्ये यज्ञम्। यज्ञम् प्रति। प्रति ष्ठापयति। स्थापयति न। नान्तम्। अन्तम् गमयति। गमयत्यग्ने। अग्ने त्री। त्री ते। ते वाजिना। वाजिना त्री। त्री षधस्था। सधस्थेति। सधस्थेति सध—स्था। इति त्रिवत्या। त्रिवत्या परि। त्रिवत्येति त्रि—वत्या। परि दधाति। दधाति सरूपत्वाय। सरूपत्वाय सर्वः। सरूपत्वा-येति सरूप—त्वाय। सर्वो वै। वा एषः। एष यज्ञः। यज्ञो यत्। यत् त्रैधातवीयम्। त्रैधातवीयम् कामायकामाय। कामायकामाय प्र। कामायकामायेति कामाय—कामाय। प्र युज्यते। युज्यते सर्वेभ्यः। सर्वेभ्यो हि। हि कामेभ्यः। कामेभ्यो यज्ञः। यज्ञः प्रयुज्यते। प्रयुज्यते त्रैधातवीयेन। प्रयुज्यत इति प्र—युज्यते। त्रैधातवीयेन यजेत। यजेताभिचरन्न्। अभिचरन्थ् सर्वः। अभिच-रन्नित्यभि—चरन्न्। सर्वो वै। वा एषः। ॥ [३१] ॥ एष यज्ञः। यज्ञो यत्। यत् त्रैधातवीयम्। त्रैधातवीयꣳ सर्वेण। सर्वेणैव। एवैनम्। एनय्यँज्ञेन। यज्ञेनाभि। अभि चरति। चरति स्तृणुते। स्तृणुत एव। एवैनम्। एनमेतया। एतयैव। एव यजेत। यजेताभिचर्यमाणः। अभिचर्यमाणः सर्वः। अभिचर्यमाण इत्यभि—चर्यमाणः। सर्वो वै। वा एषः। एष यज्ञः। यज्ञो यत्। यत् त्रैधातवीयम्। त्रैधातवीयꣳ सर्वेण। सर्वेणैव। एव यज्ञेन। यज्ञेन यजते। यजते न। नैनम्। एनमभिचरन्न्। अभिचरन्थ् स्तृणुते। अभिचरन्नित्यभि—चरन्न्। स्तृणुत एतया। एतयैव। एव यजेत। यजेत सहस्रेण। सहस्रेण यक्ष्यमाणः। यक्ष्यमाणः प्रजातम्। प्रजातमेव। प्रजात-मिति प्र—जातम्। एवैनत्। एनद् ददाति। ददात्येतया। एतयैव। एव यजेत। यजेत सहस्रेण। सहस्रेणेजानः। ईजानोऽन्तम्। अन्तव्वै। वा एषः। एष पशूनाम्। पशूनाम् गच्छति। गच्छति यः। ॥ [३२] ॥ यः सहस्रेण। सहस्रेण यजते। यजते प्रजापतिः। प्रजापतिः खलु। प्रजा-

पतिरिति प्रजा—पतिः। खलु वै। वै पशून्। पशूनसृजत। असृजत तान्। ताꣳ स्त्रैधातवीयेन। त्रैधातवीयेनैव। एवासृजत। असृजत यः। य एवम्। एवंविद्वान्। विद्वाꣳ स्त्रैधातवीयेन। त्रैधातवीयेन पशुकामः। पशुकामो यजते। पशुकाम इति पशु—कामः। यजते यस्मात्। यस्मादेव। एव योनेः। योनेः प्रजापतिः। प्रजापतिः पशून्। प्रजापतिरिति प्रजा—पतिः। पशूनसृजत। असृजत तस्मात्। तस्मादेव। एवैनान्। एनान्थ् सृजते। सृजत उप। उपैनम्। एनमुत्तरम्। उत्तरꣳ सहस्रम्। उत्तरमित्युत्—तरम्। सहस्रम् नमति। नमति देवताभ्यः। देवताभ्यो वै। वा एषः। एष आ। आ वृश्च्यते। वृश्च्यते यः। यो यक्ष्ये। यक्ष्य इति। इत्युक्त्वा। उक्त्वा न। न यजते। यजते त्रैधातवीयेन। त्रैधातवीयेन यजेत। यजेत सर्वः। सर्वो वै। वा एषः। एष यज्ञः। यज्ञो यत्। ॥ [३३] ॥ यत् त्रैधातवीयम्। त्रैधातवीयꣳ सर्वेण। सर्वेणैव। एव यज्ञेन। यज्ञेन यजते। यजते न। न देवताभ्यः। देवताभ्य आ। आ वृश्च्यते। वृश्च्यते द्वादशकपालः। द्वादशकपालः पुरोडाशः। द्वादशकपाल इति द्वादश—कपालः। पुरोडाशो भवति। भवति ते। ते त्रयः। त्रय श्चतुष्कपालाः। चतुष्कपालास्त्रिषमृद्धत्वाय। चतुष्कपाला इति चतुः—कपालाः। त्रिषमृद्धत्वाय त्रयः। त्रिषमृद्धत्वायेति त्रिषमृद्ध—त्वाय। त्रयः पुरोडाशाः। पुरोडाशा भवन्ति। भवन्ति त्रयः। त्रय इमे। इमे लोकाः। लोका एषाम्। एषाꣳल्लोकानाम्। लोकानामाप्त्यै। आप्त्या उत्तर उत्तरः। उत्तर उत्तरो ज्यायान्। उत्तर उत्तर इत्युत्तरः—उत्तरः। ज्यायान् भवति। भवत्येवम्। एवमिव। इव हि। हीमे। इमे लोकाः। लोका यवमयः। यवमयो मद्ध्ये। यवमय इति यव—मयः। मद्ध्य एतत्। एतद् वै। वा अन्तरिक्षस्य। अन्तरिक्षस्य रूपम्। रूपꣳ समृद्ध्यै। समृद्ध्यै सर्वेषाम्। समृद्ध्या इति सम्—ऋद्ध्यै। सर्वेषामभिगमयन्न्। अभिगमयन्नव। अभिगमयन्नित्यभि—गमयन्न्। अव द्यति। द्यत्यछम्बट्कारम्। अछम्बट्कारꣳ हिरण्यम्। अछम्बट्कारमित्यछम्बट्—कारम्। हिरण्यम् ददाति। ददाति तेजः। तेज एव। एवाव। ॥ [३४] ॥ अव रुन्धे। रुन्धे तार्प्यम्। तार्प्यम् ददाति। ददाति पशून्। पशूनेव। एवाव। अव रुन्धे। रुन्धे धेनुम्। धेनुम् ददाति। ददात्याशिषः। आशिष एव। आशिष इत्या—शिषः। एवाव। अव रुन्धे। रुन्धे साम्नः। साम्नो वै। वा एषः। एष वर्णः। वर्णो यत्। यद्धिरण्यम्। हिरण्यꣳ यजुषाम्। यजुषाम् तार्प्यम्। तार्प्यमुक्थामदानाम्। उक्थामदानाम् धेनुः। उक्थामदानामि-

त्युक्थ—मदानाम्। धेनुरेतान्। एतानेव। एव सर्वान्। सर्वान्वर्णान्। वर्णानव। अव रुन्धे। रुन्ध इति रुन्धे॥ ॥ [३५] ॥

(जगत्या ऽभिचरन्थ् सर्वो वै गच्छति यज्ञ स्तेज एव त्रिꣳशच्च) ॥ ११ ॥

---

त्वष्टा हतपुत्रः। हतपुत्रो वीन्द्रम्। हतपुत्र इति हत—पुत्रः। वीन्द्रꣳ सोमम्। वीन्द्रमिति वि—इन्द्रम्। सोममा। आ ऽहरत्। अहरत् तस्मिन्न्। तस्मिन्निन्द्रः। इन्द्र उपहवम्। उपहवमैच्छत। उपहवमित्युप—हवम्। ऐच्छत तम्। तम् न। नोप। उपाह्वयत। अह्वयत पुत्रम्। पुत्रम् मे। मे ऽवधीः। अवधीरिति। इति सः। स यज्ञवेशसम्। यज्ञवेशसम् कृत्वा। यज्ञवेशसमिति यज्ञ—वेशसम्। कृत्वा प्रासहा। प्रासहा सोमम्। प्रासहेति प्र—सहा। सोममपिबत्। अपिबत् तस्य। तस्य यत्। यदत्यशिष्यत। अत्यशिष्यत तत्। अत्यशिष्यतेत्यति—अशिष्यत। तत् त्वष्टा। त्वष्टा ऽऽहवनीयम्। आहवनीयमुप। आहवनीयमित्या—हवनीयम्। उप प्र। प्रावर्तयत्। अवर्तयथ् स्वाहा। स्वाहेन्द्रशत्रुः। इन्द्रशत्रुर् वर्द्धस्व। इन्द्रशत्रुरितीन्द्र—शत्रुः। वर्द्धस्वेति। इति सः। स यावत्। यावदूद्र्ध्वः। ऊद्र्ध्वः पराविद्ध्यति। पराविद्ध्यति तावति। पराविद्ध्यतीति परा—विद्ध्यति। तावति स्वयम्। स्वयमेव। एव वि। व्यरमत। अरमत यदि। यदि वा। वा तावत्। तावत् प्रवणम्। प्रवणमासीत्। प्रवणमिति प्र—वनम्। ॥ [३६] ॥ आसीद् यदि। यदि वा। वा तावत्। तावदधि। अद्ध्यग्नेः। अग्नेरासीत्। आसीथ् सः। स सम्भवन्न्। सम्भवन्नग्नीषोमौ। सम्भवन्निति सम्—भवन्न्। अग्नीषोमावभि। अग्नीषोमावित्यग्नी—सोमौ। अभि सम्। समभवत्। अभवथ् सः। स इषुमात्रमिषुमात्रम्। इषुमात्रमिषुमात्रँविष्वङ्ङ्। इषुमात्रमिषुमात्रमितीषुमात्रम्—इषुमात्रम्। विष्वङ्ङवर्द्धत। अवर्द्धत सः। स इमान्। इमाँल्लोकान्। लोकानवृणोत्। अवृणोद् यत्। यदिमान्। इमाँल्लोकान्। लोकानवृणोत्। अवृणोत् तत्। तद् वृत्रस्य। वृत्रस्य वृत्रत्वम्। वृत्रत्वम् तस्मात्। वृत्रत्वमिति वृत्र—त्वम्। तस्मादिन्द्रः। इन्द्रो ऽबिभेत्। अबिभेदपि। अपि त्वष्टा। त्वष्टा तस्मै। तस्मै त्वष्टा। त्वष्टा वज्रम्। वज्रमसिञ्चत्। असिञ्चत् तपः। तपो वै। वै सः। स वज्रः। वज्र आसीत्। आसीत् तम्। तमुद्यन्तुम्। उद्यन्तुम् न। उद्यन्तुमित्युत्—यन्तुम्। नाशक्नोत्। अशक्नोदथ। अथ वै। वै तर्हि। तर्हि विष्णुः।

विष्णुरन्या। ॥ [३७] ॥ अन्या देवता। देवताऽऽसीत्। आसीथ् सः। सोऽब्रवीत्। अब्रवीद् विष्णो। विष्णवा। एहि। इहीदम्। इदमा। आ हरिष्यावः। हरिष्यावो येन। येनायम्। अय-मिदम्। इदमिति। इति सः। स विष्णुः। विष्णुस्त्रेधा। त्रेधा ऽऽत्मानम्। आत्मानँव्वि। वि नि। न्यधत्त। अधत्त पृथिव्याम्। पृथिव्याम् तृतीयम्। तृतीयमन्तरिख्षे। अन्तरिख्षे तृतीयम्। तृतीयम् दिवि। दिवि तृतीयम्। तृतीयमभिपर्यावर्तात्। अभिपर्यावर्ताद्धि। अभिपर्यावर्तादि-त्यभि—पर्यावर्तात्। ह्यबिभेत्। अबिभेद् यत्। यत् पृथिव्याम्। पृथिव्याम् तृतीयम्। तृतीय-मासीत्। आसीत् तेन। तेनेन्द्रः। इन्द्रो वज्रम्। वज्रमुत्। उदयच्छत्। अयच्छद् विष्ण्वनु-स्थितः। विष्ण्वनुस्थितः सः। विष्ण्वनुस्थित इति विष्णु—अनुस्थितः। सोऽब्रवीत्। अब्रवीन् मा। मा मे। मे प्र। प्र हाः। हारस्ति। अस्ति वै। वा इदम्। इदं मयि। ॥ [३८] ॥ मयि वीर्यम्। वीर्यम् तत्। तत् ते। ते प्र। प्र दास्यामि। दास्यामीति। इति तत्। तदस्मै। अस्मै प्र। प्रायच्छत्। अयच्छत् तत्। तत् प्रति। प्रत्यगृह्णात्। अगृह्णादधाः। अधा मा। मेति। इति तत्। तद् विष्णवे। विष्णवेऽति। अति प्र। प्रायच्छत्। अयच्छत् तत्। तद् विष्णुः। विष्णुः प्रति। प्रत्यगृह्णात्। अगृह्णादस्मासु। अस्मास्विन्द्रः। इन्द्र इन्द्रियम्। इन्द्रियम् दधातु। दधात्विति। इति यत्। यद-न्तरिख्षे। अन्तरिख्षे तृतीयम्। तृतीयमासीत्। आसीत् तेन। तेनेन्द्रः। इन्द्रो वज्रम्। वज्रमुत्। उदयच्छत्। अयच्छद् विष्ण्वनुस्थितः। विष्ण्वनुस्थितः सः। विष्ण्वनुस्थित इति विष्णु—अनु-स्थितः। सोऽब्रवीत्। अब्रवीन् मा। मा मे। मे प्र। प्र हाः। हारस्ति। अस्ति वै। वा इदम्। इदं मयि। ॥ [३९] ॥ मयि वीर्यम्। वीर्यम् तत्। तत् ते। ते प्र। प्र दास्यामि। दास्यामीति। इति तत्। तदस्मै। अस्मै प्र। प्रायच्छत्। अयच्छत् तत्। तत् प्रति। प्रत्यगृह्णात्। अगृह्णात् द्विः। द्विर् मा। माऽधाः। अधा इति। इति तत्। तद् विष्णवे। विष्णवेऽति। अति प्र। प्रायच्छत्। अयच्छत् तत्। तद् विष्णुः। विष्णुः प्रति। प्रत्यगृह्णात्। अगृह्णादस्मासु। अस्मास्विन्द्रः। इन्द्र इन्द्रियम्। इन्द्रियम् दधातु। दधात्विति। इति यत्। यद् दिवि। दिवि तृतीयम्। तृतीयमासीत्। आसीत् तेन। तेनेन्द्रः। इन्द्रो वज्रम्। वज्रमुत्। उदयच्छत्। अयच्छद् विष्ण्वनुस्थितः। विष्ण्व-नुस्थितः सः। विष्ण्वनुस्थित इति विष्णु—अनुस्थितः। सोऽब्रवीत्। अब्रवीन् मा। मा मे। मे प्र। प्र हाः। हार्येन। येनाहम्। अहमिदम्॥ ॥ [४०] ॥ इदमस्मि। अस्मि तत्। तत् ते। ते

प्र। प्र दा॑स्यामि। दा॒स्यामीति॑। इति॒ त्वी(३)। त्वी(३) इति॑। इत्य॑ब्रवीत्। अ॒ब्रवी॒थ् स॒न्धाम्। स॒न्धाम्॒ तु। स॒न्धामिति॑ सम्—धाम्। तु सम्। सम् द॑धावहै। द॒धाव॒है त्वाम्। त्वामे॒व। ए॒व प्र। प्र वि॑शानि। वि॒शा॒नीति॑। इति॒ यत्। यन् माम्। माम् प्र॑वि॒शेः। प्र॒वि॒शेः किम्। प्र॒वि॒शेरिति॑ प्र—वि॒शेः। किम् मा॑। मा भु॒ञ्ज्याः। भु॒ञ्ज्या इति॑। इत्य॑ब्रवीत्। अ॒ब्रवी॒त् त्वाम्। त्वामे॒व। ए॒वेन्धी॑य। इ॒न्धीय॒ तव॑। त॒व भोगा॑य। भोगा॑य॒ त्वाम्। त्वाम् प्र। प्र वि॑शेयम्। वि॒शे॒यमिति॑। इत्य॑ब्रवीत्। अ॒ब्रवी॒त् तम्। तँव्वृ॒त्रः। वृ॒त्रः प्र। प्रावि॑शत्। अ॒वि॒श॒दु॒दर॑म्। उ॒दर॒व्वै॑। वै वृ॒त्रः। वृ॒त्रः ख्षुत्। ख्षुत् खलु॑। खलु॒ वै। वै म॑नु॒ष्य॑स्य। म॒नु॒ष्य॑स्य॒ भ्रातृ॑व्यः। भ्रातृ॑व्यो॒ यः। य ए॒वम्। ॥ [४१] ॥

ए॒वव्वेँद॑। वेद॒ हन्ति॑। हन्ति॒ ख्षुध॑म्। ख्षुध॑म् भ्रातृ॑व्यम्। भ्रातृ॑व्यम् तत्। तद॑स्मै। अ॒स्मै प्र। प्राय॑च्छत्। अ॒य॒च्छ॒त् तत्। तत् प्रति॑। प्रत्य॑गृह्णात्। अ॒गृ॒ह्णा॒त् त्रिः। त्रिर्मा॑। माऽधाः। अ॒धा इति॑। इति॒ तत्। तद् विष्ण॑वे। विष्ण॒वेऽति॑। अति॒ प्र। प्राय॑च्छत्। अ॒य॒च्छ॒त् तत्। तद् विष्णुः॑। विष्णुः॒ प्रति॑। प्रत्य॑गृह्णात्। अ॒गृ॒ह्णा॒द॒स्मासु॑। अ॒स्मास्विन्द्रः॑। इन्द्र॑ इन्द्रि॒यम्। इ॒न्द्रि॒यम् द॑धातु। द॒धा॒त्विति॑। इति॒ यत्। यत् त्रिः। त्रिः प्र। प्राय॑च्छत्। अय॑च्छ॒त् त्रिः। त्रिः प्र॒त्यगृ॑ह्णात्। प्र॒त्य-गृ॒ह्णा॒त् तत्। प्र॒त्यगृ॒ह्णा॒दिति॑ प्रति—अगृ॑ह्णात्। तत् त्रि॒धातौ॑। त्रि॒धातौ॑स्त्रिधातु॒त्वम्। त्रि॒धातो॒रिति॑ त्रि—धातौ॑। त्रि॒धा॒तु॒त्वय्यँत्। त्रि॒धा॒तु॒त्वमिति॑ त्रिधातु—त्वम्। यद् विष्णुः॑। विष्णु॑र॒न्ववति॑ष्ठत। अ॒न्वति॑ष्ठ॒त विष्ण॑वे। अ॒न्वति॑ष्ठ॒तेत्य॑नु—अति॑ष्ठत। विष्ण॒वेऽति॑। अति॒ प्र। प्राय॑च्छत्। अय॑च्छ॒त् तस्मा॑त्। तस्मा॑दैन्द्रावैष्णवम्। ऐ॒न्द्रा॒वैष्णव॑ꣳ ह॒विः। ऐ॒न्द्रा॒वै॒ष्ण॒वमित्यै॑न्द्रा—वै॒ष्ण॒वम्। ह॒विर् भ॑वति। भ॒व॒ति॒ यत्। यद् वै। वा इ॒दम्। इ॒दम् किम्। किम् च॑। च॒ तत्। तद॑स्मै। अ॒स्मै तत्। तत् प्र। प्राय॑च्छत्। अ॒य॒च्छ॒दृच॑ः। ऋ॒चः सामा॑नि। सामा॑नि॒ यजू॑ꣳषि। यजू॑ꣳषि स॒हस्र॑म्। स॒ह॒स्रव्वैँ॑। वा अ॑स्मै। अ॒स्मै तत्। तत् प्र। प्राय॑च्छत्। अ॒य॒च्छ॒त् तस्मा॑त्। तस्मा॑थ् स॒हस्र-द॒ख्षि॒णम्। स॒हस्र॑दख्षि॒णमिति॑ स॒हस्र—द॒ख्षि॒णम्॥ ॥ [४२] ॥

(प्र॒व॒णं विष्णु॒ र्वा इ॒द मि॒द म॒हं यो भ॑व त्येक॑ वि॒ꣳश॒तिश्च) ॥ १२ ॥

---

दे॒वा वै। वै रा॑ज॒न्या॑त्। रा॒ज॒न्या॑ज्जाय॑मानात्। जाय॑मानादबिभयुः। अ॒बि॒भ॒यु॒स्तम्। तम॒न्तः। अ॒न्त॒रे॒व। ए॒व सन्त॑म्। सन्त॒म् दाम्ना॑। दाम्नाऽप॑। अपौ॑म्भन्न्। औ॒म्भ॒न्थ् सः। स वै।

वा एषः। एषोऽपोब्धः। अपोब्धो जायते। अपोब्ध इत्यप—उब्धः। जायते यत्। यद् राजन्यः। राजन्यो यत्। यद् वै। वा एषः। एषोऽनपोब्धः। अनपोब्धो जायेत। अनपोब्ध इत्यनप—उब्धः। जायेत वृत्रान्। वृत्रान् घ्नन्। घ्नꣳश्चरेत्। चरेद् यम्। यं कामयेत। कामयेत राजन्यम्। राजन्यमनपोब्धः। अनपोब्धो जायेत। अनपोब्ध इत्यनप—उब्धः। जायेत वृत्रान्। वृत्रान् घ्नन्। घ्नꣳश्चरेत्। चरेदिति। इति तस्मै। तस्मा एतम्। एतमैन्द्राबार्हस्पत्यम्। ऐन्द्राबार्हस्पत्यं चरुम्। ऐन्द्राबार्हस्पत्यमित्यैन्द्रा—बार्हस्पत्यम्। चरुम् निः। निर् वपेत्। वपेदैन्द्रः। ऐन्द्रो वै। वै राजन्यः। राजन्यो ब्रह्म। ब्रह्म बृहस्पतिः। बृहस्पतिर् ब्रह्मणा। ब्रह्मणैव। एवैनम्। एनं दाम्नः। दाम्नो ऽपोम्भनात्। अपोम्भनान् मुञ्चति। अपोम्भनादित्यप—उम्भनात्। मुञ्चति हिरण्मयम्। हिरण्मयं दाम। दाम दख्षिणा। दख्षिणा साख्षात्। साख्षादेव। साख्षादिति स—अख्षात्। एवैनम्। एनं दाम्नः। दाम्नो ऽपोम्भनात्। अपोम्भनान् मुञ्चति। अपोम्भनादित्यप—उम्भनात्। मुञ्चतीति मुञ्चति॥ ॥ [४३] ॥

(एनं द्वादश च) ॥ १३ ॥

---

नवोनवो भवति। नवोनव इति नवः—नवः। भवति जायमानः। जायमानो ऽह्नाम्। अह्नाम् केतुः। केतुरुषसाम्। उषसामेति। एत्यग्रे। अग्र इत्यग्रे॥ भागम् देवेभ्यः। देवेभ्यो वि। वि दधाति। दधात्यायन्न्। आयन् प्र। आयन्नित्या—यन्न्। प्र चन्द्रमाः। चन्द्रमास्तिरति। तिरति दीर्घम्। दीर्घमायुः। आयुरित्यायुः॥ यमादित्याः। आदित्या अꣳशुम्। अꣳशुमाप्याययन्ति। आप्याययन्ति यम्। आप्याययन्तीत्या—प्याययन्ति। यमख्षितम्। अख्षितमख्षितयः। अख्षितयः पिबन्ति। पिबन्तीति पिबन्ति॥ तेन नः। नो राजा। राजा वरुणः। वरुणो बृहस्पतिः। बृहस्पतिरा। आ प्याययन्तु। प्याययन्तु भुवनस्य। भुवनस्य गोपाः। गोपा इति गो—पाः॥ प्राच्याम् दिशि। दिशि त्वम्। त्वमिन्द्र। इन्द्रासि। असि राजा। राजोत। उतोदीच्याम्। उदीच्याँवृत्रहन्न्। वृत्रहन् वृत्रहा। वृत्रहन्निति वृत्र—हन्न्। वृत्रहा ऽसि। वृत्रहेति वृत्र—हा। असीत्यसि॥ यत्र यन्ति। यन्ति स्रोत्याः। स्रोत्यास्तत्। तज्जितम्। ॥ [४४] ॥ जितम् ते। ते दख्षिणतः। दख्षिणतो वृषभः। वृषभ एधि। एधि हव्यः। हव्य इति हव्यः॥

इन्द्रो जयाति। जयाति न। न परा। परा जयातै। जयाता अधिराजः। अधिराजो राजसु। अधिराज इत्यधि—राजः। राजसु राजयाति। राजस्विति राज—सु। राजयातीति राजयाति॥ विश्वा हि। हि भूयाः। भूयाः पृतनाः। पृतना अभिष्टीः। अभिष्टीरुपसद्यः। उपसद्यो नमस्यः। उपसद्य इत्युप—सद्यः। नमस्यो यथा। यथा ऽसत्। असदित्यसत्॥ अस्येत्। इदेव। एव प्र। प्र रिरिचे। रिरिचे महित्वम्। महित्वम् दिवः। महित्वमिति महि—त्वम्। दिवः पृथिव्याः। पृथिव्याः परि। पर्यन्तरिक्षात्। अन्तरिक्षादित्यन्तरिक्षात्॥ स्वराडिन्द्रः। स्वराडिति स्व—राट्। इन्द्रो दमे। दम आ। आ विश्वगूर्तः। विश्वगूर्तः स्वरिः। विश्वगूर्त इति विश्व—गूर्तः। स्वरिरमत्रः। अमत्रो ववक्षे। ववक्षे रणाय। रणायेति रणाय॥ अभि त्वा। त्वा शूर। शूर नोनुमः। नोनुमोऽदुग्धाः। अदुग्धा इव। इव धेनवः। धेनव इति धेनवः॥ ईशानमस्य। ॥ [४५] ॥ अस्य जगतः। जगतः सुवर्दृशम्। सुवर्दृशमीशानम्। सुवर्दृशमिति सुवः—दृशम्। ईशानमिन्द्र। इन्द्र तस्थुषः। तस्थुष इति तस्थुषः॥ त्वामित्। इद्धि। हि हवामहे। हवामहे साता। साता वाजस्य। वाजस्य कारवः। कारव इति कारवः॥ त्वाँवृत्रेषु। वृत्रेष्विन्द्र। इन्द्र सत्पतिम्। सत्पतिम् नरः। सत्पतिमिति सत्—पतिम्। नरस्त्वाम्। त्वाम् काष्ठासु। काष्ठास्वर्वतः। अर्वत इत्यर्वतः॥ य द्यावः। द्याव इन्द्र। इन्द्र ते। ते शतम्। शतꣳ शतम्। शतम् भूमीः। भूमीरुत। उत स्युः। स्युरिति स्युः॥ न त्वा। त्वा वज्रिन्न्। वज्रिन्थ्सहस्रम्। सहस्रꣳ सूर्याः। सूर्या अनु। अनु न। न जातम्। जातमष्ट। अष्ट रोदसी। रोदसी इति रोदसी॥ पिबा सोमम्। सोममिन्द्र। इन्द्र मन्दतु। मन्दतु त्वा। त्वा यम्। यम् ते। ते सुषाव। सुषाव हर्यश्व। हर्यश्वाद्रिः। हर्यश्वेति हरि—अश्व। अद्रिरित्यद्रिः॥ ॥ [४६] ॥ सोतुर् बाहुभ्याम्। बाहुभ्याꣳ सुयतः। बाहुभ्यामिति बाहु—भ्याम्। सुयतो न। सुयत इति सु—यतः। नार्वा। अर्वेत्यर्वा॥ रेवतीर् नः। नः सधमादः। सधमाद इन्द्रे। सधमाद इति सध—मादः। इन्द्रे सन्तु। सन्तु तुविवाजाः। तुविवाजा इति तुवि—वाजाः॥ क्षुमन्तो याभिः। याभिर् मदेम। मदेमेति मदेम॥ उदग्ने। अग्ने शुचयः। शुचयस्तव। तव वि। वि ज्योतिषा। ज्योतिषोत्। उदु। उ त्यम्। त्यम् जातवेदसम्। जातवेदसꣳ सप्त। जातवेदसमिति जात—वेदसम्। सप्त त्वा। त्वा हरितः। हरितो रथे। रथे वहन्ति। वहन्ति देव। देव सूर्य। सूर्येति सूर्य॥ शोचिष्केशव्विचक्षण। शोचिष्केशमिति शोचिः—केशम्। विच-

ख्षणेति वि—चख्षण॥ चित्रम् देवानाम्। देवानामुत्। उद्गात्। अगादनीकम्। अनीकम् चख्षुः। चख्षुर् मित्रस्य। मित्रस्य वरुणस्य। वरुणस्याग्नेः। अग्नेरित्यग्नेः॥ आऽप्राः। अप्रा द्यावापृथिवी। द्यावापृथिवी अन्तरिख्षम्। द्यावापृथिवी इति द्यावा—पृथिवी। अन्तरिख्षꣳ सूर्यः। सूर्य आत्मा। आत्मा जगतः। जगतस्तस्थुषः। तस्थुषश्च। ॥ [४७] ॥ चेति च॥ विश्वे देवाः। देवा ऋतावृधः। ऋतावृध ऋतुभिः। ऋतावृध इत्यृत—वृधः॥ ऋतुभिर्हवन-श्रुतः। ऋतुभिरित्यृतु—भिः। हवनश्रुत इति हवन—श्रुतः॥ जुषन्ताँय्युज्यम्। युज्यम् पयः। पय इति पयः॥ विश्वे देवाः। देवाः शृणुत। शृणुतेमम्। इमꣳ हवम्। हवम् मे। मे ये। ये अन्त-रिख्षे। अन्तरिख्षे ये। य उप। उप द्यवि। द्यवि ष्ठ। स्थेति स्थ॥ ये अग्निजिह्वाः। अग्निजिह्वा उत। अग्निजिह्वा इत्यग्नि—जिह्वाः। उत वा। वा यजत्राः। यजत्रा आसद्य। आसद्यास्मिन्न्। आसद्येत्या—सद्य। अस्मिन् बर्हिषि। बर्हिषि मादयद्ध्वम्। मादयद्ध्वमिति मादयद्ध्वम्॥
॥ [४८] ॥

(त दीशान् मद्रि स्तस्थुष स्त्रिꣳशच्च) ॥ १४ ॥

॥ हरिः ॐ ॥

द्वितीयकाण्डे चतुर्थः प्रश्नः — क्रम पाठः — समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| १४ | ४८ |

ॐ